# Jvalamukhi Stotram

# ज्वालामुखीस्तोत्रम्

## Document Information

Text title : Jvalamukhi Stotram 2

File name : jvAlAmukhIstotram.itx

Category : devii, devI, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ज्वालामुखीस्तोत्रम्

ॐ नताः स्तुतिपराः सर्वे यस्या नित्यं दिवौकसः ।
तमो हृत्वा शङ्करस्य भूत्यै भूयात्सदाशिवा ॥ १॥

श्रीसुन्दरीं जगद्धात्रीं ज्वालाव्याप्तदिगन्तराम् ।
सुरैः सिद्धैः स्तुतां भूपैः सुमुखीं नौम्यहं शिवाम् ॥ २॥

दैत्यानां भटकोटिकोटिमुकुटाटोपानधः कुर्वतीं
    विघ्नानां कटकान्यतीव कटकान्यापाटयन्तीं स्फुटम् ।
भक्तानामभयं वरं च दधतीं शान्तात्मनां सर्वदा
    षड्वक्रेण जितां क्रियाविरहतो ज्वालामुखीं नौम्यहम् ॥ ३॥

ब्रह्माणं मधुकैटभौ वधपरौ सन्त्रासयन्तौ परं
    नानारूपधरावतीव भयदौ स्थूलोन्नतौ संयुगे ।
तौ हत्वा विनिवर्तितां कृतवतीं तन्मेदसा मेदिनीं
    सर्वेषां शुभदायिनीं भगवतीं ज्वालामुखीं नौम्यहम् ॥ ४॥

सैन्यानां महिषासुरस्य मृतिदां सिंहाधिरूढां च तां
    नानाकारविशेषसौख्यजननीं देहान्तरे संस्थिताम् ।
बालामध्यमवृद्धरूपरमणीं श्रीसुन्दरीं वैष्णवीं
    स्त्रीरूपेण जगद्विमोहनकरीं ज्वालामुखीं नौम्यहम् ॥ ५॥

देवानां भयदायकौ सुकठिनौ शुम्भो निशुम्भस्तथा
    नानाशस्त्रधरौ रिपू धृतिहरौ तौ चण्डमुण्डाङ्कितौ ।
सङ्ग्रामेऽप्यपराजितौ विकसितौ द्वौ रक्तबीजान्वितौ
    हत्वैवं सुबलां प्रसन्नवदनां ज्वालामुखीं नौभ्यहम् ॥ ६॥

संसारार्णवतारिणारिणीं रविशशिकोटिप्रभां सुप्रभां
    पापातङ्कनिवारिणीं हरिहरब्रह्मादिभिः संस्तुताम् ।
दारिद्र्यस्य विनाशिनीं सुकृतिनां जाड्यं हरन्तीं भृश-

मज्ञानान्धमतेः कवित्वजननीं ज्वालामुखीं नौम्यहम् ॥ ७॥

रत्नपञ्चकनामानं श्रीसुन्दर्याः स्तवं वरम् ।
अव्याकुलं यः पठति सोऽभीष्टां सिद्धिमाप्नुयात् ॥ ८॥

ज्वालामुखि महाज्वाले ज्वालापिङ्गललोचने ।
ज्वालातेजी महातेजी ज्वालामुखि नमोऽस्तु ते ॥

इति ज्वालामुखीस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Jvalamukhi Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*